य एनं वेत्ति हन्तारमित्यनेन मन्त्रेण हननक्रियायाः कर्ता कर्म च न भवतीति प्रतिज्ञाय न जायते इत्यनेनाविक्रियत्वं हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति --

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।

कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ २१ ॥

वेद विजानात्यविनाशिनमन्त्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेदेति संबन्धः। एनं पूर्वेण मन्त्रेणोक्तलक्षणमजं जन्मरहितमव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वान्पुरुषोऽधिकृतो हन्ति हननक्रियां करोति कथं वा घातयति हन्तारं प्रयोजयति। न कथंचित्कंचिद् हन्ति न कथंचित्कंचिद् घातयतीत्युभयत्राक्षेपैवार्थः प्रश्नार्थासंभवात्। हेत्वर्थस्य चाविक्रियत्वस्य तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एव प्रकरणार्थोऽभिप्रेतो भगवता। हन्तेस्त्वाक्षेप उदाहरणार्थत्वेन कथितः॥

विदुषः कं कर्मासंभवहेतुविशेषं पश्यन्कर्माण्याक्षिपति भगवान्कथं स पुरुष इति। ननूक्त एवात्मनोऽविक्रियत्वं सर्वकर्मासंभवकारणविशेषः। सत्यमुक्तः। न तु सः कारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियादात्मनः। न ह्यविक्रियं स्थाणुं विदितवतः कर्म न संभवतीति चेन्न विदुष आत्मत्वात्। न देहादिसंघातस्य विद्वत्ता। अतः पारिशेष्यादसंहत आत्मा विद्वानविक्रिय इति तस्य विदुषः कर्मासंभवादाक्षेपो युक्तः कथं स पुरुष इति। यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्याविक्रिय एव सन् बुद्धिवृत्त्यविवेकविज्ञानेनाविद्यया उपलब्धा आत्मा कल्प्यते एवमेवात्मानात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्ययासत्यरूपयैव परमार्थतोऽविक्रिय एवात्मा विद्वानुच्यते। विदुषः कर्मासंभववचनाद्यानि कर्माणि शास्त्रेण विधीयन्ते तान्यविदुषो विहितानीति भगवतो निश्चयोऽवगम्यते॥

ननु विद्याप्यविदुष एव विधीयते विदितविद्यस्य पिष्टपेषणवद्विद्याविधानानर्थक्यात्। तत्राविदुषः कर्माणि विधीयन्ते

न विदुष इति विशेषो नोपपद्यते इति चेन्नानुष्ठेयस्य भावाभावविशेषोपपत्तेः। अग्निहोत्रादिविध्यर्थज्ञानोत्तरकालम् अग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वकमनुष्ठेयं कर्ताहं मम कर्तव्यमित्येवंप्रकारविज्ञानवतोऽविदुषो यथानुष्ठेयं भवति न तु तथा न जायत इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेयं भवति किं तु नाहं कर्ता नाहं भोक्ता इत्याद्यात्मैकत्वाकर्तृत्वादि-विषयज्ञानान्नान्यदुत्पद्यत इत्येष विशेष उपपद्यते। यः पुनः कर्ताहमिति वेत्त्यात्मानं तस्य ममेदं कर्तव्यमित्यवश्यंभाविनी बुद्धिः स्यात्तदपेक्षया सोऽधिक्रियत इति तं प्रति कर्माणि संभवन्ति। स चाविद्वानुभौ तौ न विजानीत इति वचनाद्विशेषितस्य च विदुषः कर्माक्षेपवचनाच्च कथं स पुरुष इति। तस्माद्विशेषितस्याविक्रियात्मदर्शिनो विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारः। अत एव भगवान्नारयणः सांख्यान्विदुषोऽविदुषश्च कर्मिणः प्रविभज्य द्वे निष्ठे ग्राहयति ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति। तथा च पुत्रायाह

भगवान्व्यासो द्वाविमावथ पन्थानौ इत्यादि। तथा च क्रियापथश्चैव पुरस्तात्पश्चात्संन्यासश्चेति। एवमेव विभागं पुनः पुनर्दर्शयिष्यति भगवानतत्त्वविदहंकारविमूढात्मा कर्ताहमिति मन्यते तत्त्ववित्तु नाहं करोमीति। तथा च सर्वकर्माणि मनसा संन्यस्यास्त इत्यादि॥

तत्र केचित्पण्डितंमन्या वदन्ति जन्मादिषड्भावविक्रिया-रहितोऽविक्रियोऽकर्तैकोऽहमात्मेति न कस्यचिज्ज्ञानमुत्पद्यते यस्मिन्सति सर्वकर्मसंन्यास उपदिश्यत इति। तन्न न जायत इत्यादिशास्त्रोपदेशानर्थक्यप्रसङ्गात्। यथा च शास्त्रोपदेश-सामर्थ्याद्धर्माधर्मास्तित्वविज्ञानं कर्तुश्च देहान्तरसंबन्धविज्ञानम् उत्पद्यते तथा शास्त्रात्तस्यैवात्मनोऽविक्रियत्वाकर्तृत्व- एकत्वादिविज्ञानं कस्मान्नोत्पद्यत इति प्रष्टव्या ते। करणागोचरत्वादिति चेन्न मनसैवानुद्रष्टव्यमिति श्रुतेः। शास्त्राचर्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्। तथा

च तदधिगमायानुमान आगमे च सति ज्ञानं नोत्पद्यत इति साहसमात्रमेतत्। ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमवश्यं बाधत इत्यभ्युपगन्तव्यम्। तच्चाज्ञानं दर्शितं हन्ताहं हतोऽस्मीत्युभौ तौ न विजानीत इति। ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमवश्यं बाधत इत्यभ्युपगन्तव्यम्। तच्चाज्ञानं दर्शितं हन्ताहं हतोऽस्मीत्युभौ तौ न विजानीत इति। अत्र चात्मनो हननक्रियायाः कर्तृत्वं कर्मत्वं हेतुकर्तृत्वं चाज्ञानकृतं दर्शितम्। तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेरविद्याकृतत्वम् अविक्रियत्वादात्मनः। विक्रियवान्हि कर्तात्मनः कर्मभूतमन्यं प्रयोजयति कुर्विति। तदेतदविशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान्वासुदेवो विदुषः कर्माधिकाराभावप्रदर्शनार्थं वेदाविनाशिनं -- कथं स पुरुष इत्यादिना। क्व पुनः विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव ज्ञानयोगेन सांख्यानामिति। तथा च सर्वकर्मसंन्यासं वक्ष्यति सर्वकर्माणि मनसा इत्यादिना॥

ननु मनसेति वचनान्न वाचिकानां कायिकानां च संन्यास इति चेन्न सर्वकर्माणीति विशेषितत्वात्। मानसानामेव सर्वकर्मणामिति चेन्न मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनोव्यापाराभावे तदनुपपत्तेः। शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि कर्माणि वर्जयित्वान्यानि सर्वकर्माणि मनसा संन्यस्येदिति चेन्न नैव कुर्वन्न कारयन्निति विशेषणात्। सर्वकर्मसंन्यासोऽयं भगवतोक्तो मरिष्यतो न जीवत इति चेन्न नवद्वारे पुरे देह्यास्त इति विशेणानुपपत्तेः। न हि सर्वकर्मसंन्यासेन मृतस्य तद्देह आसनं संभवति। अकुर्वतोऽकारयतश्च देहे संन्यस्येति संबन्धो न देह आस्त इति चेन्न सर्वत्रात्मनोऽविक्रियत्वावधारणादासन-क्रियायाश्चाधिकरणापेक्षत्वात्तदनपेक्षत्वाच्च संन्यासस्य। संपूर्वस्तु न्यासशब्दोऽत्र त्यागार्थो न निक्षेपार्थः। तस्माद्गीताशास्त्र आत्मज्ञानवतः संन्यास एव अधिकारो न कर्मणीति तत्र तत्रोपरिष्टादात्मज्ञानप्रकरणे दर्शयिष्यामः॥